श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये अष्टषष्टितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये अष्टषष्टितमं दशकम् ॥

## गोपीनां भगवत्समागमादिवर्णनम्

तव विलोकनाद्गोपिकाजनाः
    प्रमदसङ्कुलाः पङ्कजेक्षण।
अमृतधारया सम्प्लुता इव
    स्तिमिततां दधुस्त्वत्पुरोगताः ॥ **68.1** ॥

तदनु काचन त्वत्कराम्बुजं
    सपदि गृह्णती निर्विशङ्कितम्।
घनपयोधरे सन्निधाय सा
    पुलकसंवृता तस्थुषी चिरम् ॥ **68.2** ॥

तव विभोऽपरा कोमलं भुजं
    निजगलान्तरे पर्यवेष्टयत्।
गलसमुद्गतं प्राणमारुतं
    प्रतिनिरुन्धतीवातिहर्षुला ॥ **68.3** ॥

अपगतत्रपा कापि कामिनी
    तव मुखाम्बुजात् पूगचर्वितम्।
प्रतिगृहय्य तद्वक्त्रपङ्कजे
    निदधती गता पूर्णकामताम् ॥ **68.4** ॥

विकरुणो वने संविहाय मा -
    मपगतोऽसि का त्वामिह स्पृशेत्।

इति सरोषया तावदेकया
    सजललोचनं वीक्षितो भवान्॥ **68.5** ॥

इति मुदाऽऽकुलैर्वल्लवीजनैः
    सममुपागतो यामुने तटे।
मृदुकुचाम्बरैः कल्पितासने
    घुसृणभासुरे पर्यशोभथाः॥ **68.6** ॥

कतिविधा कृपा केऽपि सर्वतो
    धृतदयोदयाः केचिदाश्रिते।
कतिचिदीदृशा मादृशेष्वपी -
    त्यभिहितो भवान् वल्लवीजनैः॥ **68.7** ॥

अयि कुमारिका नैव शङ्क्यतां
    कठिनता मयि प्रेमकातरे।
मयि तु चेतसो वोऽनुवृत्तये
    कृतमिदं मयेत्यूचिवान् भवान्॥ **68.8** ॥

अयि निशम्यतां जीववल्लभाः
    प्रियतमो जनो नेदृशो मम।
तदिह रम्यतां रम्ययामिनी -
    ष्वनुपरोधमित्यालपो विभो॥ **68.9** ॥

इति गिराधिकं मोदमेदुरै -
    र्व्रजवधूजनैः साकमारमन्।
कलितकौतुको रासखेलने
    गुरुपुरीपते पाहि मां गदात्॥ **68.10** ॥

॥ इति श्रीमन्नारायणीये अष्टषष्टितमं दशकं समाप्तम्॥